श्री वराह स्तोत्रं

श्री वराह स्तोत्रं

ततः स राजा श्रीमुष्णे नित्यपुष्करिणी जले |
स्नात्वा संतर्प्य देवादीं शुचिर्भूत्वा जितेंद्रियः ||1||

पिप्पलद्रुममासाद्य जितसानपरिग्रहः |
तुष्टावजवतामीशं नारायणमनामयं ||2||

राजा उवाच -
शुद्धस्फटिकसंकाशं पूर्णचंद्रनिभाननं |
कठिन्यस्त करद्वंद्वं श्रीमुष्णेशं नमाम्यहं ||3||

स्रष्टारं सर्वलोकानां प्रेरगं सर्वदेहिनां |
पालकं पालनीयानां श्रीमुष्णेशं नमाम्यहं ||4||

हर्तारं प्रलयेकाले रक्षकं मध्यवर्तिनां |
वैराग्यदं स्वभक्तानां श्रीमुष्णेशं नमाम्यहं ||5||

चिदानंदघनं पूर्णं सर्वदोषविवर्जितं |
स्वाभिनं सर्वलोकानां श्रीमुष्णेशं नमाम्यहं ||6||

येनं व्याप्तमिदं सर्वं बहिरं तश्च सर्वदा |
सर्वा वह्न्या प्रेरकंच श्रीमुष्णेशं नमाम्यहं ||7||

भूतं भव्यं भविष्यच्च जगदे तच्चराचरं |
तद्वशे वर्तते नित्यं श्रीमुष्णेशं नमाम्यहं ||8||

ओतप्रोतमिदं यत्र वटवन्विश्वतो मुखं |
सुमुखं सुस्मितं शांतं श्रीमुष्णेशं नमाम्यहं ||9||

अनादिमंतकालेऽपि यस्स्वामी सर्वदेहिनां |
नमादिदेवं देवेशं श्रीमुष्णेशं नमाम्यहं ||10||

निर्मायं मायिनामीशं निर्गुणं षड्गुणार्णवं |
निर्दोषं निश्चलानंदं श्रीमुष्णेशं नमाम्यहं ||11||

सदाऽव्यक्तं सदाऽभासं सदासंतोष संवृतं |
सदाविलिप्त विज्ञानं श्रीमुष्णेशं नमाम्यहं ||12||

दयानिधिं दयाहीनं जीवानामार्तिहं विभुं |
दैत्यांतकं गदापाणिं श्रीमुष्णेशं नमाम्यहं ||13||

पीतांबरधरं देवं दंडकांतकमच्युतं |
देवेंद्रदर्पहर्तारं श्रीमुष्णेशं नमाम्यहं ||14||

अग्राह्यमक्षरं नित्यं निर्भेद्यं निरवग्रहं |
निरस्तसाम्यातिशयं श्रीमुष्णेशं नमाम्यहं ||15||

निर्गलं निश्चलं विष्णुं वेदवेद्यं सनातनं |
विद्याधीशं विदां श्रेष्ठं श्रीमुष्णेशं नमाम्यहं ||16||

कमलोद्भव तातं तं कमलापतिमीश्वरं |
कंजांघ्रिं कमलाक्षंच श्रीमुष्णेशं नमाम्यहं ||17||

चैत्रे कृष्णचतुर्दश्यां रेवत्यां भानुवासरे |
अश्वत्थरूपं वाराहं श्रीमुष्णेशं नमाम्यहं ||18||

मुहूर्ते पंचमे जातं चैत्रेऽश्विन्यां च कृष्णके |
अर्कवारे त्रयोदश्यां श्रीमुष्णेशं नमाम्यहं ||19||

वराहं वरदं शांतं पुण्यश्रवणकीर्तनं |
झिल्लिकावनहंतारं श्रीमुष्णेशं नमाम्यहं ||20||

नित्यपुष्करिणीतीरवासिनं वनमालिनं |
मुनिहृन्पद्मनिलयं श्रीमुष्णेशं नमाम्यहं ||21||

यज्ञं यज्ञपतिं यज्ञ कर्तारं यज्ञभावनं |
यज्ञांगं यज्ञगोप्तारं श्रीमुष्णेशं नमाम्यहं ||22||

संसारभय-भीतानां जंतूनामभयप्रदं |
सामगीतं सुराध्यक्षं श्रीमुष्णेशं नमाम्यहं ||23||

सहस्रवदनं देवं सहस्राक्षं सदाशुभं |
सदामंगलकर्तारं श्रीमुष्णेशं नमाम्यहं ||24||

ज्ञानगं कामदं भुक्ति-मुक्तिदं मुनिवंदितं |
निराश्रयं सदाऽऽधारं श्रीमुष्णेशं नमाम्यहं ||25||

वटपत्रपुटेयोगशायिनं बालमीश्वरं |
तमद्भुतार्धकाकारं श्रीमुष्णेशं नमाम्यहं ||26||

दुग्धाब्धि-शायिनं देवमनंतोरसिवासिनं |
वैकुंठ-निलयं विष्णुं श्रीमुष्णेशं नमाम्यहं ||27||

वासुदेवं जगद्योनिं जगज्जाड्य हरं हरिं |
जंभारि-प्राणदं पूर्णं श्रीमुष्णेशं नमाम्यहं ||28||

धर्मप्रियं धर्मरूपं धर्मगोप्तारमव्ययं |
धर्मदत्प्रलदातारं श्रीमुष्णेशं नमाम्यहं ||29||

जाह्नवी जनकं कालं व्योमकेशं वृषाकपिं |
कवेंद्रवाहनं कोलं श्रीमुष्णेशं नमाम्यहं ||30||

नित्यं स्तवं प्रमव्यक्तं भक्ताधीनं परात्परं |
दामोदरं हृषीकेशं श्रीमुष्णेशं नमाम्यहं ||31||

यन्नामस्मृतिमात्रेण कोटिजन्माघनाशनं |
भवेतं भावशुद्धानां श्रीमुष्णेशं नमाम्यहं ||32||

कंदर्पकोटिलावण्यं कोटिसूर्यसमप्रभं |
कोटींदु-जगदानंदं श्रीमुष्णेशं नमाम्यहं ||33||

अनधेहारकेयूरकुंडलांगदमंडितं |
नीलालकं विशालाक्षं श्रीमुष्णेशं नमाम्यहं ||34||

ब्रह्म-रुद्रेंद्र-गरुड-किन्नरो-रग-राक्षसैः |
संसेव्यमानदरणं श्रीमुष्णेशं नमाम्यहं ||35||

हृत्पद्मकर्णिकामध्ये मुनिभिर्मनसाऽर्चितं |
भक्तकल्पद्रुमं शांतं श्रीमुष्णेशं नमाम्यहं ||36||

हृषीकेशं हृषीकानां लियामकमरिंदमं |
हृषीकमलदातारं श्रीमुष्णेशं नमाम्यहं ||37||

योंतः प्रविश्य सततं धारयेन्निखिलाकृतिं |
प्रापयंतं फलं नित्यं श्रीमुष्णेशं नमाम्यहं ||38||

विपदां परिहर्तारं दातारं सर्वसंपदां |
कर्तारं सर्वलोकानां श्रीमुष्णेशं नमाम्यहं ||39||

हिरण्याक्षवधोद्दंडबाहुदंडमहीधरं |
दंडितेंद्रियहृद्वासं श्रीमुष्णेशं नमाम्यहं ||40||

दंष्ट्राकरालवदनं भृकुटी कुटिलेक्षणं |
स्फटिकातृणिभातारं श्रीमुष्णेशं नमाम्यहं ||41||

श्रीशंकरः --
इति राजा स्तुवन्नास्ते श्रीमुष्णेवासमावहन |
उद्वेला अभवन्सर्वे समुद्रात्कालचोदिताः ||42||

एकार्णवमभोत् तत्र पश्यति-क्षितिशेश्वरं |
अभ्रांतोयोगमारूढं निरीक्ष्य प्रलयं तथा ||43||

आत्मन्यात्मानमादाय परेब्रह्मनितिष्कले |
सजहोभोदिकं देहं प्रविवेशाच्युतोदरं ||44||

प्रवृत्तेस्मिन् ब्रह्मकल्पे स राजा च शतक्रतुः |
यज्ञे पुरंदरो नाम देवानामग्रणीर्बली ||45||

देव-दानव-गंधर्व-यक्ष-राक्षस-किन्नरैः |
संगीयमान-सत्कीर्तिः अप्सरो-गण-सेवितः ||46||

पत्नी स धुनी शचीनाम्ना ललनानां शिरोमणिः |
देवेंद्र इति विख्यातः त्रैलोक्यादि पतिर्विभुः ||47||

कथितं प्राप्तुमखिलं श्रीमुष्णेशः प्रसादतः |
एवमन्ये च भूपालाः देवाश्च ऋषयोऽपरे ||48||

यक्ष-किन्नर-साध्याश्च श्रीमुष्ण-क्षेत्रवासिनः |
सिद्धिमापुर्महात्मानो योगिनामपि दुर्लभं ||49||

देवाश्च-सिद्ध-संकल्पाः मुनयोऽमलचेतसः |
श्रीमुष्णे-वासमिच्छंति मनुष्याणां तु का कथा ||50||

श्रीमुष्णेशसमोदेवः क्षेत्रं श्रीमुष्णसन्निभं |
विचारितेषु शास्त्रेषु नास्ति नास्ति न संशयः ||51||

श्रुत्वा श्रीमुष्णमाहात्म्यं दृष्ट्वा श्रीमुष्णनायकं |
स्नात्वा श्रीमुष्णतीर्थेषु पुनर्जन्म न विद्यते ||52||

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते |
श्रीमुष्णे मरणादेव मुक्तिमेति न संशयः ||53||

ब्रह्मज्ञानमृतेत्वापि मुक्तिर्नैवोपजायते |
गंगायां तारकब्रह्म-ज्ञानं सोपतिशेद्धरः ||54||

श्रीमुष्णे गरुडो ब्रह्मज्ञानं चोपतिसत्यलं |
श्रीमुष्णेशवराहस्य परितो योजनत्रयं ||55||

गयाप्रयागकाशीद्यः सत्ये शतगुणाधिकं |
तस्मान्नारद संसेव्यं श्रीमुष्णं पापनाशनं ||56||

श्रीमुष्णाभिमुखो भूत्वा सदा वृद्धाचले मुने |
तपश्चरं वसाव्यंग श्रीमुष्णेशं च विनयन् ||57||

इति श्रीब्रह्मांडपुराणे श्रीमुष्णमाहात्म्ये शंकर-नारद-संवादे
श्रीवराहस्तोत्रं-नाम एकादशोद्यायः ||